# धर्मशास्त्रीयसाहित्ये अनुसन्धानक्षेत्राणि

**प्रो. भगवती सुदेश**

लोके दृश्यते यद् ज्ञानपरम्परायां सामाजिकानां मनोवैज्ञानिकानां राजनैतिकानाञ्च कारकाणाम् अन्येषाञ्चापि सम्बद्धकारकाणां कारणात् जनानां दृष्टिकोणेषु अभिवृत्तिषु आग्रहेषु च परिवर्तनं समायाति। फलतः, **तथ्येषु** नानाविधानि आवरणानि आपतन्ति। बारम्बारम् अध्ययनस्य अनुवर्तित्वात् वयं तानि आवरणानि अपावृत्य सत्यं ज्ञानं प्रत्यक्षीकर्तुं शक्नुमः येन समाजस्य मानवस्य चापि उद्धारः सम्भवति। श्रुतिः वदति-

**"हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।**
**तत्त्वं पूषण् अपावृणु लोकधर्मार्थदृष्टये ।।"**

मनुष्यस्य प्रगतेः मूलं कारणं तस्य जिज्ञासा अस्ति। स सर्वदा स्वीयं वातावरणं जिज्ञासादृष्ट्या पश्यति, तत् वातावरणं अवबोद्धुं नियन्त्रयितुं च प्रयतते। नेदम् आवश्यकं यत् स स्वप्रयासे सफलः एव भवेत् परन्तु स जिज्ञासायाः ज्योतिः प्रज्वाल्य इतः गच्छति भाविसन्ततिश्च तस्याः समस्यायाः समाधाने प्रवर्तते। अनुसन्धानं सत्यान्वेषणस्य क्रमबद्धः गतिविधिः। शोधः गवेषणा च इमौ द्वौ शब्दौ प्रायेण अनुसन्धानस्य अर्थे प्रयुज्येते । शोधशब्दः शुद्धिं, संस्कारं अथवा संशोधनं सूचयति। गवेषणाशब्दः अन्वेषणार्थे एव प्रयुज्यते। यदि वयं गवेषणापदस्य सन्धिविच्छेदं कुर्मः तर्हि गो + एषणा, यस्य अर्थः भविष्यति गोः एषणा। प्राचीनकाले भारतीया संस्कृतिः अरण्येषु पर्वतानाम् उपत्यकासु च विकसिता अभवत् । पशुपालनं भारतीयानां प्रमुखः व्यवसायः आसीत्। तदानीं बालाः वा स्युः प्रौढाः वा तेषां प्रमुखा काचन क्रिया आसीत् गोचारणम्। वने गावः सुदूरं चरणाय यान्ति स्म। गोधूलिवेलायां तासां प्रत्यावर्तनाय व्यापिका एषणा भवति स्म। इयमेव एषणात्मिका क्रिया प्राचीनसाहित्ये गवेषणेति नाम्ना प्रसिद्धा अभवत्। भवतु पूर्णतया नवीनतथ्यस्य अन्वेषणे गवेषणापदं प्रयोक्तुं शक्यते, परन्तु विचाराणां क्षेत्रे नूतनाः उद्भावनाः, कल्पनाः, नूतनाः प्रक्रियाश्च गवेषणापदेन सम्यक् प्रकटीकर्तुं न शक्यन्ते। अत एव सर्वत्र शिक्षाक्षेत्रे अनुसन्धानशब्दस्यैव प्रयोगः दृश्यते। अनुसन्धानशब्दस्य स्वरूपं यदि विवेचयामः तर्हि शब्दे अस्मिन् परिवीक्षणं, गहनं निरीक्षणं, योजनाबद्धाध्ययनं, सोद्देश्यं सामान्यीकरणं, सिद्धान्तस्थापनञ्चेत्यादयः प्रक्रियाः महत्त्वपूर्णाः सन्ति। अनुसण्धानं नवतत्यानि प्रकाशयत्येव। यद् ज्ञानं प्रागेव परम्परातः प्राप्तं तसय् संक्रमणं यद्यपि अविरतं जायते तथापि पौनःपुन्येन तस्मिन् अवगाहिते सति ज्ञानमिदं समधिकं पोषणं प्राप्नोति। अपि च, तस्मिन् ज्ञाने कालानुरोधेन भ्रान्त्यः उत्पद्येरन् तर्हि निराकरणम्पि जायते, वयं सत्यस्य इतोऽप्यधिकं सामीप्यं भजामः। शास्त्रेषु उक्तम्- "वादे वादे जायते तत्त्वबोधः"। मानवस्य सांस्कृतिकविकासस्य गूढं रहस्यं वस्तुतः अनुसन्धाने एव निहितं वर्तते।

अनुसन्धानस्य परिभाषा वर्तते- " अनुसन्धानम् एका बौद्धिकप्रक्रिया अस्ति। एषा प्रक्रिया पूर्ववर्तिनीः अशुद्धाः अवधारणाः संशोधयति तथा व्यवस्थितरीत्या वर्तमानज्ञानकोषे

वृद्धिं करोति"। परिभाषामिमाम् आधारीकृत्य धर्मशास्त्रविषये शोधच्छात्रैः नूतनानां तथ्यानाम् आविष्करणं, पर्यालोचनं च कर्तुं शक्यते। प्राचीनावधारणानां साम्प्रतिकयुगधर्मानुसारं पर्यालोचनं, परिष्कारप्रयासश्च कर्तुं शक्यते। पुनश्च धर्मशास्त्रस्य यद् विपुलं साहित्यम् अप्रकाशितं वर्तते तस्य सम्पादनं समीक्षणं चापि कर्तुं शक्यते।

**अनुसन्धानप्रकाराः-**

तत्र अनुसन्धानं त्रिविधम् उच्यते -मौलिक-व्यवहृत-विवरणात्मकभेदात्। मौलिकानुसन्धानस्य मुख्योद्देश्यं वर्तते नूतनानां प्रश्नानाम् अर्थात् सिद्धान्तानां निर्माणम्। एवंविधस्य अनुसन्धानस्य मुख्यं कारणं तथ्यानाम् एकीकरणम् अस्ति। यथा शान्तिपर्वणि शान्त्याः सन्दर्भे यावन्ति अपि तथ्यानि सन्ति तानि एकत्रीकृत्य तदाधारेण शान्तिः इति विचारस्य परिभाषा, सम्प्रत्ययः, सिद्धान्तः इत्येतेषां निर्माणम्। मौलिकानुसन्धाने अभिनवेषु विचारेषु तथ्येषु वा उपस्थितेषु तेषां स्वरूपस्य सम्प्रत्ययस्य सिद्धान्तादीनञ्च निर्धारणम् आवश्यकम्। तदभावे एषां विचाराणां व्यवहारे प्रवर्तनम् असम्भवम्। यथाहि, गीता कर्मयोगं प्रतिपादयति तर्हि भगवदाज्ञानुसारम् अस्माभिः कर्माणि अनुष्ठेयानि। प्रश्न उदेति- 'कानि कर्माणि अनुष्ठेयानि', 'कर्मणः किं स्वरूपम्', 'कतिविधानि कर्माणि' इति। एते खलु सैद्धान्तिकाः प्रश्नाः येषाम् उत्तराभावे सति अस्माकं पुरस्तात् सैद्धान्तिकबाधाया उपस्थितत्वात् वयं सम्यक् कर्मप्रवृत्तावपि बाधामनुभवामः। अस्यां दशायं मौलिकानुसन्धानेन वयं कर्मणः स्वरूप, सम्प्रत्ययं, प्रकारान्, सिद्धान्तांश्च रचयामः।

उपलब्धानि तथ्यानि आधृत्य यदि अनुसन्धाता कामपि क्रियात्मकसमस्यां समादध्यात् तर्हि इदमनुसन्धानं व्यवहृतानुसन्धानं कथ्यते। यथा, सामाजिके असन्तोषे यदि अस्माकं शास्त्रेषु शान्तेः सिद्धान्तान् आदर्शान् शिक्षाः च आधारीकृत्य कामपि प्रक्रियां निर्माय समस्यायाः समाधानार्थं प्रयोगविधिः, अवधेयांशाः, गुणाः, दोषाः इत्थं प्रयासः क्रियते चेत् सम्भावना अस्ति यत् असन्तोषस्य निराकरणे किञ्चित् सहायता लभ्येत। व्यवहृतानुसन्धाने काचित् व्यावहारिकी समस्या प्रक्रियादृशा समाधीयते। अर्थात् येषां सिद्धान्तानां विचाराणाञ्च ज्ञानमस्मभिः अधिगतम्, तत्सकलं व्यवहारे आनीय समाजस्य समक्षम् उपस्थितानां समस्यानां समाधानं विधीयते। उदाहरणार्थम्, संस्काराः व्यक्तेः समाजस्य च आचरणे कथम् आनेतव्याः, के च ते नियमाः, कश्च पाठ्यक्रमः येन उद्देश्यमिदं पूरयितुं शक्येत। इत्थं वयम् अवलोकयामः यत् मौलिकानुसन्धानस्य लक्ष्यं सिद्धान्तानां संरचना उपस्थापनं च वर्तते यत् शुद्धज्ञानात्मकप्रक्रिया अस्ति। एषां सिद्धान्तानां कृते व्यावहारिकरूपप्रदानम् अथवा प्रायोगिकप्रक्रियायाः संरचना व्यवहृतानुसन्धानस्य लक्ष्यम् अस्ति।

विवरणात्मकानुसन्धाने विचारस्य सिद्धान्तस्य मान्यतादेः विषये कस्मिंश्चिद् ग्रन्थविशेषे उत विभिन्नेषु सम्बद्धग्रन्थेषु यत्किमपि प्रतिपादितं, तस्य विवरणस्य प्रस्तुतिः क्रियते। उक्तविवरणस्य प्रस्तुतिकाले शोधकर्ता समीक्षायाः, समालोचनायाः तुलनायाश्च आश्रयमपि गृह्णाति। यथा, महाकविमाघस्य महाकाव्ये सदाचारात्मकाः विचाराः।

धर्मशास्त्रे अनुसन्धानस्य किं स्वरूपं स्यादिति पर्यालोचनार्थम् आवश्यकं यत् किं नाम धर्मशास्त्रीयं साहित्यं, के च तत्र प्रतिपाद्या विषया इति आप्रथमम् आलोच्येत। स्मृतिषु

कर्तव्यम्, पालनम्, धारणम्, संस्कारश्चेत्यादयः धर्मस्य सुप्रसिद्धाः अर्थाः सन्ति। एतेषां प्रतिपादकं शास्त्रमेव धर्मशास्त्रम्। "धारणाद् धर्मः' व्युत्पत्तिरियं पुराणेषु उपलभ्यते। धर्मस्य नैके मनोरमाः परिभाषाः अपि शास्त्रे लक्ष्यन्ते। वस्तुतः, समय समये धर्मशब्दस्य विविधाः अर्थाः आचार्यैः विहिताः। तेषां लक्षणानि तु भिन्नभिन्नानि प्रतीयन्ते, किन्तु तेषां तात्पर्यम् एकमेव। महर्षिः कणादः "अथातो धर्मं व्याख्यास्यामः" इतिप्रतिपाद्य आह- 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः' अर्थात् येन अस्मिन् लोके अभ्युदयस्य परलोके च मोक्षस्य सिद्धिः स्यात् स एव धर्मः। आचार्यो मनुः सामान्यधर्मं गौतमः वेदं धर्मस्य मूलं मनुते। यद्यपि गौतमो धर्मस्य लक्षणं सुस्पष्टं न परिभाषितवान्, तथापि तेनोक्तम्- 'वेदोऽखिलो धर्ममूलम्, तद्विदाञ्च स्मृतिशीले।' तदनुयायिनः 'वेदविहितकर्मजन्यो धर्मः, निषिद्धकर्मजन्यस्त्वधर्मः' इतुपदिशन्ति। मनुः अखिलो वेदः, वेदज्ञानां परम्परा, वेदज्ञानां व्यवहारः, शिष्टानाम् आचारः आत्मतुष्टिश्चेति धर्ममूलत्वेन प्रतिपादयति। षड्विधाः प्रवृत्तधर्माः उक्ताः- वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, सामान्यधर्मश्च। एतैः सर्वैः धर्मैः देहस्य, जगतः आत्मनश्च उपकारो जायते। एतत्त्रयम् एभ्यो धर्मेभ्यः आधारं लभन्ते। नारायणोपनिषदि उक्तम्- "धर्मो विश्वस्य जगतः प्रतिष्ठा धर्मे सर्वं प्रतिष्ठितम्'। अर्थात् धर्म एव संसारस्य स्थितेः मूलभूतम्।

धर्मस्य त्रयो भेदाः विहिताः- सामान्यधर्मः विशेषधर्मः आपद्धर्मश्च। यान् गुणान् आचर्य समाजस्य मानवस्य च अभ्युदयो भवति स सामान्यधर्म उच्यते। धर्मस्य लक्षणानि सामान्यधर्ममाध्यमेन इत्थं निरूपितानि मनुना-

" धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥"

वर्णाश्रमस्य व्यवस्थाम् अनुसृत्य चतुर्भ्यो वर्णेभ्यः चतुर्भ्यः आश्रमेभ्यश्च विहितो धर्मः विशेषधर्म उच्यते। देशं कालं पात्रञ्च विचार्य सद्भावालम्बनेन शास्त्रमर्यादात्मकस्य यस्य धर्मस्य पालनं विधीयेत स हि आपद्धर्मः अभिधीयते। अत्रावधेयं यत् निवृत्ते आपत्काले मानवः पुनः तदीयं मूलधर्मम् अंगीकुर्यात्। मनुजः आपद्धर्मेऽपि शिष्टानाम् आज्ञां समनुपालयेदिति धर्मशास्त्रे प्रतिपादितम्।

भविष्यपुराणे धर्माधर्मयोःप्रमाणत्वेन वेदा एव अभिमताः। केचिद् आहुः धर्मे वेदा एव प्रमाणं न तु स्मृतिपुराणानां प्रमाण्यम्। नेदं युक्तम्। महर्षयःवेदार्थं स्मरन्तः सारभूतलौकिकाचरणार्हान् पदार्थान् उपादिशन्। ते उपदेशा एव 'स्मृति'पदेन ज्ञायन्ते। वस्तुतः, अनेकशाखामण्डलेषु विभक्तस्य वेदराशेः, चतुर्णां वर्णानां, चतुर्णाम् आश्रमाणां, नित्यानुष्ठानादीनाम् अनेकविभागानं सत्त्वात् सर्वैः तज्ज्ञानम् असम्भवमासीत्। मन्त्रद्रष्टारः ऋषयः ज्ञानं विभज्य लोकव्यवहारे समर्थाः नैकस्मृतीः रचयामासुः। वैदिकसिद्धान्तस्य प्रभावत्वात् स्मृतयः धर्मस्य प्रमाणत्वेन अमन्यन्त। अतः वेदानां स्वतःप्रामाण्यं स्मृतीनां वेदमूलकत्वात् प्रामाण्यं वर्तते। धर्माधर्मयोः विवेचनक्रमे श्रुतिस्मृत्योः विरोधे सति श्रुतिरेव प्राधान्यं भजते। उक्तं जाबालिना- 'श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी।' द्वयोः श्रुत्योः मिथः विरोधे सति मनुः आह- उभावपि हि तौ धर्मौ सम्यगुक्तौ महर्षिभिः॥" श्रुतिः

श्रवणमननिदिध्यासनस्य विषयः। स्मृतिः स्मरणविषयः पारम्परिकं धार्मिकसाहित्यं चास्ति। संकुचितार्थे स्मृतिधर्मशास्त्रयोः न कोऽपि भेदः। धर्मस्य मूलं वेद इत्यनेनसिद्ध्यति यत् धर्मशास्त्रस्य परम्पराऽपि वेदात् समागता। वेदस्य षड् अंगानि 'वेदांग'पदेन प्रसिद्धानि- शिक्षा, कल्पः, व्याकरणं, निरुक्तं, छन्दः, ज्योतिषश्च। कल्पाख्ये वेदांगेचतुर्विधं सूत्रसाहित्यम् उपलभ्यते- गृह्यसूत्रम्, शुल्वसूत्रम्, श्रौतसूत्रम्, श्रौतसूत्रम् तथा धर्मसूत्रम्।

**धर्मसूत्राणि-**

धर्मसूत्रं वैदिकसाहित्यस्य महत्त्वपूर्णम् अंगम्। वैदिकशाखानुसारं यथा ब्राह्मण-आरण्यक-उपनिषदः पृथक् पृथक् सन्ति, तथैव धर्मसूत्राण्यपि प्रतिशाखं भिद्यन्ते। धर्मसूत्राणि कल्पपरम्पराम् अनुसरन्ति। कल्पस्य अर्थो वर्तते- 'कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम्'। स्फुटम् यत् यज्ञयागादीनां बृहत्कर्मणां विवाहादीनां गृह्यकर्मणां प्रतिपादकसाहित्येन सह धर्मसूत्राणां प्रगाढः सम्बन्धः। यासां शाखानां सर्वाणि कल्पसूत्राणि उपलभ्यन्ते तेषु बौधायन-आपस्तम्ब-हिरण्यकेशिसञ्ज्ञकानि प्रधानभूतानि। एषु कल्पपरम्परायाः समग्रता लक्ष्यते, यतः तेषां श्रौत-गृह्य-धर्माख्यानि त्रीण्यपि सूत्राणि सन्ति। धर्मसूत्राणि आर्यजातीयानाम् आचारनियमैः सह संबद्धानि आसन्; अतः कालान्तरे सर्वाणि धर्मसूत्राणि सर्वाभ्यः शाखाभ्यः प्रमाणत्वेन मान्यताम् अलभन्त। ऐतिहासिकानुसन्धानस्य दृशा विषयोऽयम् अतीव महत्त्वमावहति। सन्दर्भेऽस्मिन् उपलब्धप्रमाणानां साक्ष्याणाञ्च समालोचनात्मकाध्ययनस्य व्यापकसम्भावनाः अभिलक्ष्यन्ते। होती हैं। धर्मसूत्राणां मुख्यं प्रतिपाद्यं वर्तते- आचारः, विधिनियमाः, सविधि क्रियासंस्काराणां निरूपणम् । गृह्यसूतराणि गृह्ययज्ञान्, प्रातःसायंकालीनम् अर्चनम्, वार्षिकयज्ञः, विवाह-पुंसवन-जातकर्मोपनयनादिसंस्कारान्, स्नातकनियमान्, मधुपर्क-श्राद्धकर्मप्रभृतीन् विषयांश्च विवृण्वन्ति, तद्विधींश्चापि स्फुटीकुर्वन्ति। इथम् अवलोकयामो यत् सामाजिकं नैतिकञ्च परिवेशं जनयितुं धर्मसूत्राणां महद् अवदानं विद्यते।

**स्मृतयः-**

धर्मसूत्राणां परं मनुयाज्ञवल्क्यबृहस्पतिनारदादीनां आचार्याणां स्मृतयः प्रणीता अभवन्। श्रुतिभिन्नं साहित्यं प्रदर्शयितुमेव 'स्मृति'शब्दस्य प्रयोगः अभवत्। इत्थं सम्पूर्णं धर्मशास्त्रसाहित्यं द्वेधा विभक्तम्- श्रुतिग्रन्थाः स्मृतिग्रन्थाश्च। श्रुतिग्रन्थेषु वेद-ब्राह्मण-आरण्यक-उपनिषदादि समस्तं वैदिकसाहित्यम्, स्मृतिग्रन्थेषु च मनु-यज्ञवल्क्य-विष्णु-नारद-बृहस्पति-कात्यायन-हारीत-देवल-पराशरादीनाम् आचार्याणां ग्रन्थाः अन्तर्भवन्ति।

स्मृतयः भारतीयास्मितायाः द्वारभूताः, अपि च सकलमानवजात्याः लौकिकस्य आमुष्मिकस्य च चिन्तनस्य की आधारभूता अपि सन्ति, यतोहि स्मृतयः श्रुतिमूलाः श्रुतयश्च अपौरुषेयाः सन्ति । धर्मस्य निर्धारणे श्रुतयः अथ च स्मृतय एव प्रमाणम्। इदं तु सर्वविदितं तथ्यं यत् प्रमेयस्य सिद्धिः प्रमाणैरेव भवति। अत एव धर्मजिज्ञासवः श्रुतिं स्मृतिञ्च प्रमाणं मन्यन्ते- "धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः"। धर्मशास्त्रस्य अन्तर्गतं समाज-भूगोल-पर्यावरण-धर्म-नीति-कर्मकाण्ड-व्यवस्था-राष्ट्रियता-अपराध-दण्ड-अर्थ-काम-लोक-

परलोकप्रभृतीनां सैद्धान्तिकं व्यावहारिकञ्च विवेचनं सविस्तरं समुपलभ्यते।

अहं मन्ये मानवजीवनस्य न कोऽपि बिन्दुः अवशिष्यते यत्र शास्त्रकाराणां लेखनी न प्रवर्तिता स्यात्। राजा, प्रजा, मातापितरौ, पुत्रपुत्र्यौ, स्त्री-पुंसौ, जडचेतने, कर्माकर्म, खाद्याखाद्ये, पापपुण्ये, जीवनमरणम्, गुणदोषौ अपि च समाजस्य प्रत्येकम् अंगस्य जनानां स्वभावं तेषाम् आवश्यकतां चावधाय स्मृतयः प्रवृत्ताः, याः सार्वजनीनाः, सार्वभौमिकाः, सर्वकालिकाः सर्वजनावगम्याश्च वर्तन्ते। भारतीया संस्कृतिः धर्मशास्त्रैः पुराणेतिहासादिभिश्च भरिताऽस्ति। तेषां पठनपाठनानुसन्धानस्य अप्रवर्तित्वात् भारतीयो जनः संस्कृतिं रक्षितुम् अक्षमतां आश्रयति। अतः राष्ट्रनिर्माणाय सुसंस्कृतैः, सच्चरित्रवद्भिः जनैः भारतीयधर्मस्य प्रोन्नत्यै अग्रे पादप्रक्षेपः अवश्यं विधेयः। कामचारं कामभक्षञ्च निवारयितुं धर्मशास्त्रेषु निर्देशाः प्रदत्ताः यैः पापेभ्यः त्रातुं शक्येत, अन्यथा प्रायश्चित्तस्य तत्र विधानं निगदितम्।

बहूनां विषयानां प्रतिपादनम् अथवा तद्विवेचनम् अवलोकयामश्चेत् मनोः याज्ञवल्क्यस्य च स्मृती सर्वाः अतिशयाते। आचार्यमनोः स्मृतौ आचारस्य महर्षेः याज्ञवल्क्यस्य च स्मृतौ व्यवहारस्य प्रामुख्यं लक्ष्यते। स्मृतयः सामान्यरूपेण आचारो व्यवहारः प्रायश्चित्तश्चेति त्रीन् विषयान् निरूपयन्ति। आचारप्रकरणे चतुर्णां वर्णानाम् अनुष्ठेयकर्मणां विधानं वर्तते। गृहस्थस्य कर्तव्यानि, आश्रमान्तरस्थैः सह तस्य व्यवहारः, वानप्रस्थिनो जीवनं तत्कर्तव्यानि च, संन्यासिनो लक्षणं तद्धर्मःदिनचर्या वृत्तिश्चेति बहुविधविषयाः स्मृतिषु चर्चिताः सन्ति। स्मृतिषु व्यवहृतः 'व्यवहार'शब्दः वर्तमानाया 'दण्डनीत्याः' पर्यायः अर्थात् न्यायव्यवस्था। यावत् मानवता धर्मनिष्ठिता सत्यनिष्ठिता चासीत् तावत् व्यवहारस्य आवश्यकतैव नासीदिति व्यवहारममुम् उद्दिश्य मनुयाज्ञवल्क्यनारदपराशरादीनां स्मृतिकाराणाम् अभिमतमासीत् । किन्तु, यदाराभ्य जनमानसे राद्वेषयोः वृद्धिः, सत्यस्य ह्रासः लोकमर्यादायाः अभावश्च अभवत्, तदानीम् अयं व्यवहारः उत दण्डनीततितिरियम् आविरभवत्। अर्थात् राज्यशासन्स्य अपेक्षा उदभवत्। व्यवहारप्रकरणान्तर्भूताः दायभाग-स्त्रीधन-उत्तराधिकारपत्रादयो विषयाः स्मृतिग्रन्थेषु मिताक्षरापरार्कप्रभृतीनां व्याख्यास्वपि उल्लेखनीयं स्थानमलभन्त सविशेषं सविस्तरञ्च तेषां विवेचनमभूत, यथा, ऋणादानम्, निक्षेपः, अस्वामिविक्रयः, सीमाविवादः, दायभागश्चेत्यादयः अष्टादशविधाः व्यवहाराः। सम्प्रति इमे विषयाः न्यायपदेन अभिधीयन्ते यत्र आपराधिकाः तद्भिन्नाश्च विधिनियमाः अन्तर्भवन्ति। तत्र आपराधिकविधिनियमेषु दण्डः तत्प्रकाराश्च, तथा साक्षी तत्प्रकाराः, शपथम्, दिव्यानि, अग्निशुद्धिः, व्यवहारस्य प्रक्रिया, न्यायविदो गुणाः और न्यायनिर्णयस्य रीतिः नीतिश्च विवरीता वर्तते। स्मृतिषु प्रायश्चित्तस्य विधानम् आचारव्यवहारयोः प्रकरणयोः अनन्तरमेव व्याख्यातम्। प्रकरणेऽस्मिन् अवश्यकर्तव्यतया निर्धारितानां धार्मिकानां सामाजिकानाञ्च कर्मणाम् अननुष्ठानत्वात् अथवा तदुपेक्षितत्वात् उद्भूयमानानां पापानां प्रायश्चित्तविधिः विवेचितो वर्तते।

स्मृतिग्रन्थेषु अनेके आचार्याः टीकाभाष्यादिकं प्राणयन्। एतदतिरिच्य एकैकं विषयमादाय स्वतन्त्रनिबन्धग्रन्थाः विविधविषयाणां संग्रहात्मका ग्रन्थाश्चापि विरचिताः,

यथा हेमाद्रेः चतुर्वर्गचिन्तामणौ कमलाकरभट्टस्य निर्णयसिन्धौ स्मृतीपुराणादीनां बहवो विषयाः संगृहीताः।

**आश्रम-व्यवस्था-**

मनुजं व्यवस्थिततया स्वजीवनं यापयितुं प्रेरयन्ति धर्मशास्त्राणि। तदनुसारं स धर्मार्थकाममोक्षाख्यैः चतुर्भिः पुरुषार्थैः समन्वितेन जीवनेनैव श्रेयः प्राप्नोति। अत एव तस्य समग्रं जीवनं ब्रह्मचर्यादिषु चतुर्षु सोपानेषु विभक्तम्। आब्रह्मचर्यं संन्यासावधिका यात्रा मानवजीवनस्य निःशेषं विकासं विज्ञापयति। नास्त्यत्र सन्देहलेशो यत् संपूर्णजीवनस्य एकोंऽशः ब्रह्मचर्यं साधयित्वा सम्यग् विद्याभ्यासाय उपन्यस्येत चेत् व्यक्तौ समीचीनं व्यक्तित्वम् आविर्भूयादिति निश्चप्रचम्। गृहस्थजीवनापन्नो मनुजः अतिथिसत्कार-पञ्चमहायज्ञ-दान-श्राद्धादीनि कर्तव्यानि अनुपालयेत्। ततः वानप्रस्थम् उत संन्यासं ग्रहीतुम् आदिष्टोऽस्ति सः। अन्तिमेऽस्मिन् सोपाने व्यक्तिः अन्तिमं पुरुषार्थं मोक्षं सार्थकं कर्तुं प्रयतते। तत्र स प्रभुसायुज्यस्य जिजीविषायां तल्लीनो भवति। इत्थं धर्मशास्त्रैः प्रतिपादितायाम् आश्रमव्यवस्था मानवजीवनाय नूनम् उपादेया। अस्याः व्यवस्थायाः समसामयिकीं प्रासंगिकताम् उपादेयताञ्च उद्दिश्य शोधस्य अनुसन्धानस्य च नैकाः सम्भावनाः लक्ष्यन्ते।

**संस्काराः**

संस्काराणां कोटिद्वयं निर्दिष्टं- ब्रह्मसंस्काराः दैवसंस्काराश्च। मानवस्य जीवने एषां संस्काराणां सार्थकतां सामयिकीं प्रासंगिकतां चोद्दिश्य शोधोऽपेक्ष्यते। ऊर्ध्वाधोभेदेन मनुजस्य द्विधा गतिः लक्ष्यते। साम्प्रतिकं विश्वम् आसमन्तात् तन्यताकुण्ठायुद्धादीनां विभीषिकया ग्रस्तम्। कठिनोऽयं कालः मानवतायै दृश्यते। भारतवर्षमेव विश्वस्मै विश्वाय शान्त्याः सुखाय च पन्थानं प्रदर्शयितुं प्रभवति। आवश्यकता वर्तते सदाचारयुतस्य मानवस्य निर्माणम्। वर्तमानपरिप्रेक्ष्ये भारतीयधर्मशास्त्रस्य मानवस्य उत्थानात्मकानां समन्वयवादिनाञ्च तत्त्वानि अनुशील्य वैश्विकसमाजय उपस्थापनम् अभीष्टम्। विषयममुम् उद्दिश्य अन्तर्वैषयिकानुसन्धानस्य सम्भावनाः अगणिताः वर्तन्ते। सुविदितमेव यद् 'धर्म'शब्दस्य सम्प्रत्ययः अन्यमतावलम्बिनां तत्सम्बन्धिनः सम्प्रत्ययात् नितान्तं भिन्नमस्ति। अतह् धर्मतत्त्वस्य आस्माकीनः सम्प्रत्ययः विश्वस्य पुरस्तात् उपस्थाप्येत तर्हि आप्रथमम् अस्माकं शैक्षिकपाठ्यचर्यायां तस्य सन्निवेशः स्यात्। शिक्षाविद्भिः अस्मिन् सन्दर्भे शोधः प्रवर्तनीयः येन तथाकथितैः प्रगतिवादिभिः पाश्चात्त्यः धर्मस्य सम्प्रत्यये पातितः सम्प्रदायार्थवती छाया अपसार्येत।

धर्मो हि समाजस्य अभिन्नाङ्गं भवति। मनुना व्याख्यातस्य धर्मस्य सार्वभौमिकतां सार्वजनीनताञ्च प्रतिष्ठापयितुम् आधुनिकसमाजशास्त्रेण सह प्राचीनधर्मशास्त्रस्य तुलनात्मकं समीक्षात्मकं समालोचनात्मकञ्च अध्ययनम् अनिवार्यम्। अनुसन्धातॄणाम् इदं महद्दायित्वं यत्ते गभीरतया तथ्यमिदं प्रकाशयेयुः। मन्वादिभिः आचार्यैः सार्वकालिकतया सार्वत्रिकया च परिभाषितस्य धर्मस्य धर्मविशेषमात्रेण संयोजनं न न्यायसंगतम्। अमुं विषयं सर्न्वजनग्राह्यं विधातुं तदनुरूपाणां शिक्षणविधीनामपि आविषकारः अपेक्षते। अतः धर्मशास्त्र-शिक्षाशास्त्रयोः सहकृतानुसन्धानम् अभीष्टम्। धर्मस्य एषां लक्षणानां विषये शास्त्रान्तरैः अभिव्यक्ताः विचाराः उल्लेखयोग्याः, अतः तेषाम् अनुशीलनं अवश्यं कार्यम्। धृतेः धारकः धीर इत्युच्यते।

कालिदासेन उक्तं कुमारसम्भवे- "विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः।" अमुष्याः धृतेः यद्यपि साधना अतीव कठिना तथापि प्रयत्नस्तु नूनं विधेयः। क्षमा कोऽपि अलौकिको गुणः यद्विषये यदा कदा भ्रान्तिः उत्पद्यते। निर्बलाः कातरा वा जनाः क्षमामवलम्ब्य अन्यायं सहमानाः गर्वोक्तिं प्रस्तुवन्ति यत्ते तु क्षमावन्तः, किन्तु सत्यम् इदमेव- 'क्षमा वीरस्य भूषणम्'।

सत्यामपि शक्तौ ये जनाः स्वीयं मनः मस्तिष्कञ्चापि स्ववशे स्थापयितुं प्रभवन्ति, ते एव वस्तुतः क्षमावन्तः इति। जगत्यस्मिन् इन्द्रियेषु यः विजयं प्राप्नोति स विजय एव दमः इति कथ्यते। मनोद्वारैव ही इन्द्रियाणि निग्रहीतुं शक्यन्ते। यो मानवः तदीयानि कर्मेन्द्रियाणि निरोध्य मनस्येव विषयान् स्मरन् तिष्ठति, आचरणमिदं गीतायां मिथ्याचारत्वेन प्रतिपादितः भगवता कृष्णेन। विषयेभ्यो रसस्य निवृत्तिरेव मोक्षः, तेषु रसनमेव बन्ध इतिप्रकारिका बुद्धिरेव धीः अभिधीयते।

सम्प्रति धर्मशास्त्रीयसाहित्ये अनुसन्धानस्य दृष्ट्या किञ्चिद् आलोच्यते। तत्र

धर्मशास्त्रं धर्मः, अर्थः, कामः, मोक्षश्चेति पुरुषार्थचतुष्टयस्य निरूपणं करोति। धर्मविषयकं विवेचनं पूर्वमेव विहितम्। अर्थदृशा धर्माचार्यैः बहुविधं प्रतिपादनं विहितम्। गृहस्थाश्रमे प्राप्ते सति जीवनयात्रायायै, परिवारस्य भरणपोणाय, नित्य-नैमित्तिकादिकर्मणाम् अनुष्ठानाय, अतिथिसत्कार-दानादिसत्कर्मणाञ्च के सम्पादनाय धनम् आवश्यकम्। भोगमात्रम् निमित्तीकृत् कदापि अर्थसंग्रहं न कुर्यात्। मनुः ब्राह्मणं तपः त्यागवृत्तिञ्च निर्वोढुं निर्दिशति। सः अश्वस्तनिकः, त्र्यैहिकः, कुम्भीधान्यः अथवा अधिकाधिकं कुसूलधान्यः स्यात्। केवलं एकस्मै दिनाय यस्य सकाशे भोजनसामग्री स्यात् सः अश्वस्तनिक उच्यते। त्रिदिवसात्मिका भोजनसामग्री स्याच्चेत् वह त्र्यैहिकः कथ्यते। एकवर्षस्य कृते यस्य सकाशे भोजन सामग्री स्यात् स कुम्भीधान्यः, त्रिवर्षात्मिकायां भोजनसामग्र्यां सत्यां कुसूलधान्यश्च अभिधीयते। अपि च, मनुः वर्णधर्म-आश्रमधर्म-राजधर्म-आपद्धर्मादीन् सर्वान् विषयान् विशदं वर्णयित्वा मानवस्य अन्तिमलक्ष्यं मोक्षं निरूपयति। वस्तुतः आवश्यकता वर्तते यत् सांस्कृतिकं और समाजशास्त्रीयञ्च परिप्रेक्ष्यम् आश्रित्य अनुसन्धानं प्रवर्त्येत। विभिन्नेषु धर्मेषु तथ्यानीमानि स्वीक्रियन्ते। तत्रापि इमानि जीवनस्य आधारभूततत्त्वानि मूल्यानि च वर्तन्ते। भेदस्तु इयानेव यत् अस्माकम् परम्परायां इमानि तत्त्वानि धर्मस्यैव पर्यायान्तराणि, किन्तु अन्यत्र धर्मो बहिरङ्गप्रतीकैः अभिज्ञायते, मूल्यानि च पार्थक्येन ज्ञायन्ते, यथा, धृतिक्षमादेः मूल्यम्। मूल्यानां शिक्षा आधुनिकशिक्षायां समावेशं प्राप्नुयात्। अस्याः शिक्षायाः मूलस्रोतांसि धर्मशास्त्रेषु एव निहितानि। तत्र शिक्षायाः लक्ष्याणि, शिक्षायाः पाठ्यवस्तु, शिक्षणविधिः, अनुशासनम्, गुरु-शिष्य सम्बन्धः (उपनयनस्य अन्तर्गतः स्याद् अथवा अभिवादनपरम्परायाः अन्तर्गतः), इत्यादयः बहवः विषयाः सन्ति यत्र धर्मशास्त्राणि उपकुर्युः। शिक्षाशास्त्रस्य दृष्ट्या यद्यपि एतेषु खण्डं खण्डमादाय अनुसन्धानं तु विधीयते एव; परन्तु समग्रतायाः दृष्ट्या स्मृतीनां धर्मसूत्राणाञ्च अनुशीलनम् आवश्यकम्।

सुविदितमिदं यद् आश्रमानुगुणं अथ च वर्णाश्रमानुगुणं धर्मशास्त्रेषु प्रतिपादितानां पुरातनीनां व्यवस्थानाम् आधुनिके सन्दर्भे कठोराः रूढिग्रस्ताः भेदभावग्रस्ताश्च मन्यमानाः

सन्ति। परन्तु, नैवं यत् आचार्यैः प्रतिपादिताः समेऽपि निर्देशाः, उपदेशाः, विधयः अर्थहीनाः स्युः। निश्चयेन वक्तुं शक्नुमः यद् एवंविधाः आचाराः अपि धर्मशास्त्रेषु प्रतिपादिताः ये समाजे ऐक्यं विधातुमर्हन्ति वैयक्तिकम् अभ्युदयञ्चापि सम्पादयितुं शक्नुवन्ति। अतः आधुनिकपरिप्रेक्ष्ये धर्मसूत्राणां स्मृतीनां च तान् अंशान् पुनः प्रकाशयितुं आवश्यकता वरीवर्ति।

व्यवहारप्रकरणे दत्तकसम्बद्धान् विषयान् गृहीत्वा अनुसन्धानं कर्तुं शक्यते। दण्डनीत्याः आधारोऽपि इदमेव प्रकरणं वर्तते। दायभागोऽपि इदमेव प्रकरणम् अन्तर्गच्छति। यावन्तोऽपि विधिनियमाः इमान् विषयान् आदाय उपकल्पिताः, तेषां समेषामपि आधारः धर्मशास्त्रीया व्यवहारपद्धतिरेव विद्यते। इदं परमावश्यकं यत् प्राचीनार्वाचीनानां विधिनियमानां तुलनात्मकम् अनुशीलनं समये समये प्रवर्त्येत येन तेषां पुरातनमूलतत्त्वानां मौलिकता न नश्येत् यानि आधारीकृत्य एते विधिनियमाः विकासम् अवाप्नुवन्। अत एव धर्मशास्त्रस्य शोधच्छात्राणां दायित्वमिदं यत् पूर्विक्तदृशा तुलनात्मकम्, समीक्षात्मकम्, आलोचनात्मकञ्च अनुसन्धानं सम्पादयेयुः। यद्यपि नैकेषां मूर्धन्यानां धर्मशास्त्रीयकृतीनां सम्पादनं प्रकाशनञ्च अभवत्, परन्तु साम्प्रतमपि बहवो निबन्धग्रन्थाः आभारतं भिन्नभिन्नेषु पुस्तकालयेषु विद्यन्ते येषां सम्पादनस्य एवं प्रकाशनस्य महती आवश्यकता वर्तते। धर्मशास्त्रस्य अध्येतारः इदमपि अवश्यं जानीयुः यत् धर्मशास्त्रीयविषयान् समाश्रित्य अद्यापि संस्कृते भाषान्तरे च स्वतन्त्राः ग्रन्थाः विरच्यन्ते, अतः अनुसन्धानवेलायां सम्बद्धसाहित्यत्वेन एषाम् आधुनिकग्रन्थानामपि सर्वेक्षणम् अध्ययनं चातीव महत्त्वपूर्णम्, यथा आचार्यकिशोरचन्द्रमहापात्र प्रणीतो दायविषयको ग्रन्थः 'हिन्दूविधि'।

इत्थं वयम् अवलोकयामः यत् धर्मशास्त्रस्य क्षेत्रम् अत्यन्तं व्यापकम्। कौटिल्यार्थशास्त्रे धर्मशास्त्रस्य चर्चा परिलक्ष्यते। स्मृतिग्रन्थेषु अनेकेषाम् आचार्याणां टीकाभाष्यादिकं वर्तते, विविधविषयाणां संग्रहोऽपि अभवत्, यथा हेमाद्रेः पुरुषार्थचिन्तामणिः, कमलाकरभट्टस्य निर्णयसिन्धुः। मेधातिथिः, विज्ञानेश्वरः, हलायुधः, पारिजातः, गोविन्दराजः, जीमूतवाहनः, अपरार्कः, हेमाद्रिश्चेत्यादयो बहवः भाष्यकाराः निबन्धकाराश्च स्वस्वरचनानां माध्यमेन धर्मशास्त्रं विकासयितुं प्रकाशयितुं चापि प्रधानभूमिकां निरवहन्। राजधर्मस्य अपि च व्यवहारविषयकाणां तथ्यानामपि प्रभूतमात्रायां निरूपणम्भूत्, येन लोके तत्कालीनराज्यानां, राज्ञां प्रजानां तेषां सम्पदादिविषये नानाविधानि विवरणानि लभ्यन्ते। अनया दृशा धर्मशास्त्रेषु निरूपिताः नियमाः सर्वेभ्यः सर्वदा परमकल्याणप्रदाः वर्तन्ते।

**सन्दर्भग्रन्थाः**

1. सिध्धू, कुलबीर सिंहः, मैथडलाॅजी आॅफ रिसर्च इन एजूकेशन, स्टर्लिंग पब्लिकेशन प्रा.लि., नई दिल्ली, 2007।

2. सिंह, राम पाल,ः शैक्षिक अनुसंधान एवं सांख्यिकीय, विनोद पुस्तक मंदिर आगरा, 2005।

3. सिंह, अररुण कुमारः "मनोविज्ञान, समाजशास्त्र तथा शिक्षा में शोध विधियाँ" मोतीलाल बनारसी दास, नई दिल्ली, 2009

4. धर्मशास्त्रस्येतिहासः, प्रो. जयकृष्णमिश्रः, चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी, 2010

5. धर्मशास्त्र का इतिहास, डॉ.पाण्डुरङ्ग वामन काणे, उत्तरप्रदेश हिन्दी संस्थान, 1992

6. मनुस्मृतिः,

7. याज्ञवल्क्यस्मृतिः, गङ्गासागरराय, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 1999

8. व्यवहाराध्यायः, डॉ.कमलनयन शर्मा, जगदीश संस्कृत पुस्तकालय, 2009

9. व्यवहारमयूखः, पी.वी.काणे, राष्ट्रिय संस्कृत संस्थान, नईदिल्ली, 2009

10. संस्कार विमर्श, प्रो.भगवती सुदेश, राष्ट्रिय संस्कृत साहित्य केन्द्र, जयपुर, 2008

11. कल्याण, धर्मशास्त्र विशेषांक, गीताप्रेस, गोरखपुर